**तन्त्रिका** स्त्री तन्त्रयते तन्त्रि-ई ततः स्वार्थे क पूर्वाणो ह्रस्वः । गुडूच्याम् । अमरः ।

**तन्त्रि** स्त्री तन्त्रि-इ । १तन्त्र्याम् २तन्द्रायां च "अपेततन्त्रि धर्मात्मा यज्वा सत्वसमन्वितः" भा० आनु० ३१४२अ० ।

**तन्त्रित** त्रि० तन्त्रा तन्द्रा जाताऽस्य तार० इतच् । आलस्ययुक्ते "धार्मिको नित्यभक्तश्च पितुर्नित्यमतन्त्रितः" भा० शा० १२७।१२ । "गव्यं दीर्घेण कालेन युक्तेनातन्त्रितेन च" भा० आनु० १६२ अ० । "अतन्त्रिता सा स्वयमेव वृक्षकान्" कुमा० ।

**तन्त्रिपाल** पु० सहदेवे तन्तिपालशब्दे दृश्यम् ।

**तन्त्रिपालक** पु० जयद्रथराजे शब्दम० ।

**तन्त्री** स्त्री तन्त्रि-ई । १वीणागुणे २गुडूच्यां ३देहशिरायां मेदि० । "स ददर्श श्वमांसस्य कृतन्त्रीं विततां मुनिः" भा० शा० १४१अ० । ४नदीभेदे ५नाड्यां ६युवतीभेदे शब्दर० । अस्य ङीबन्तत्वाभावेन बहुव्रीहौ स्वाङ्गे नाडीतन्त्र्योः पा० न कप् तदभावेऽपि न ह्रस्वः । बहुतन्त्रीर्ग्रीवा बहुतन्त्रीर्धमनी" सि०कौ० । स्वाङ्ग इत्युक्तेः बहुतन्त्रीका वीणेत्यादौ कप् । "सप्ततन्त्री प्रथिता चैव वीणा" भा० व० १३४अ० । अस्वाङ्गत्वेऽपि आर्षत्वात् न कप् । ७रज्जौ "न लङ्घयेत् वत्सतन्त्रीं" मनुः "यस्य वाचा प्रजाः सर्वा गावस्तन्त्र्येव यन्त्रिताः" भाग० ३।१५।८ । ८वीणायाश्च "कण्डूयमानः सततं लोकानटति चञ्चलः । चतुर्यानो नरेन्द्राणां तन्त्रीवैराणि चैव ह" हरिवं० ५७अ० ।

**तन्त्वग्र** न० ६त० । तन्तूनामग्रे ततो गन्धा० छ । तन्त्वग्रीय तद्भवादौ त्रि० ।

**तन्थी(स्थी)** अव्य० तन-वा थी । ऊर्यादिगणे तस्थीत्यत्र पाठान्तरम् गणर० स्वीकारे अभ्युपगमे । गतिसंज्ञकत्वात् समासे तन्थी(स्थी)कृत्य ।

**तन्द्रा** स्त्री तद्रि-भावे अ । १ईषन्निद्रायाम् २आलस्ये च हेमच० "तमोवातकफात्तन्द्रा" इति वैद्यकम् तल्लक्षणञ्च "इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः । निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्" माधवः "शुचिर्गुरुवचोदक्षस्तन्द्रानिद्राविवर्जितः" "विषयेन्द्रियसंमोषस्तन्द्रालस्यविवर्जनम्" याज्ञ० । निद्रायां प्रबुद्धस्य क्लमाभावः । तन्द्रायां तु प्रबुद्धस्यापि क्लम इत्यनयोर्भेदः । तन्द्रा च दुःसहस्य भार्या निद्रायाः कन्या प्रीतेर्भगिनी यथाह "निद्राकन्या च तन्द्रा सा प्रीतिकन्या सुखप्रिये । याभ्यां व्याप्तं जगत्सर्वम्" शब्दार्थचि० कृतवाक्यम् ३पङ्क्तिच्छन्दसि न० । "तन्द्रं छन्दः" यजु० १५।५ । तद्रि सादे मोहे च तन्द्रति सीदति स्थानसंकोचेनेति तन्द्रं श्रेणी "पङ्क्तिर्वै तन्द्रं छन्दः" इति श्रुतेः" वेददी०

**तन्द्रयु** त्रि० तन्द्रामालस्यं याति या-कु पृषो० । आलस्ययुक्ते "मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानाम्" ऋ० ८।९२।३० "तन्द्रयुरालस्ययुक्तः" भा०

**तन्द्रवाप** पु० तन्त्रवाप+पृषो० । तन्त्रवाये शब्दार्थचि० ।

**तन्द्रालु** त्रि० स्त्री० तद्रि-आलुच् । १ईषन्निद्रायुक्ते २आलस्ययुक्ते च जटाधरः ।

**तन्द्रि** स्त्री स्त्री० तद्रि-क्रिन् । १ईषन्निद्रायाम् २आलस्ये च उणादिको "विभक्तनक्तन्दिवमस्ततन्द्रिणा" किरा० । तद्रि-ई तन्द्रीत्यपि तत्रार्थे अयं न ङीबन्तस्तेन न सुलोपः । तन्द्रीश्च अत्यन्तश्रमादिना सर्वाङ्गेन्द्रियाप्रमुक्तम् । सर्वाङ्गेन्द्रियनिमीलनापादकत्वात् तथात्वम् । "क्षुधा च तन्द्रा च विषण्णतां गतः" रामा० अयो० ८० अ० । "गततन्द्रीक्लमौ वापि चर्षणेनैतौ महारथौ" २८८अ० । जिततन्द्रीः गततन्द्रीः इत्यादौ ङीबन्तत्वाभावात् ह्रस्वः न वा कप् ।

**तन्द्रिज** पु० यदुवंश्ये कनवकरूपपुत्रभेदे "तन्द्रिजस्तन्द्रिपालश्च सुतौ कनवकस्य तु" हरिवं ३५ अ० ।

**तन्द्रित** त्रि० तन्द्रा जाताऽस्य तार० इतच् । जातालस्ये "य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः" "अतन्द्रिता सा स्वयमेव वृक्षकान्" कुमा० । अतन्त्रितेति पाठान्तरम् ।

**तन्द्रिपाल** पु० यदुवंश्ये कनवकरूपपुत्रभेदे तन्द्रिजशब्दे दृश्यम्

**तन्नि** स्त्री तन्नयति नी-वा० डि । (चाकुल्या) चक्रकुल्यायां रत्नमाला । तन्विरित्यपि पाठः । पृषो० ।

**तन्वी** स्त्री तनुः कृशा स्त्री गुणवचनोदन्तत्वात् वा ङीष् । १कृशाङ्ग्यां स्त्रियां तनुशब्दे उदा० "अप्रभूतमतनीयसि तन्वी" माघः । २शालपर्ण्यां (शालपान) राजनि०

**तन्मय** त्रि० तदात्मकम् तद्+मयट् । तदात्मके "तन्मयं विद्धि मां विप्र ! इतोऽहं येन मया च ते" हरिवं १६९ अ० ।

**तन्मात्र** न० तदेव एवार्थे मात्रच् सा मात्रा यस्य वा । सांख्यादिसिद्धेषु शब्दादिषु सत्स्वपि शान्तादिर्विशेषोऽस्ति । यथोक्तं विष्णुपुराणे "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता । तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते । न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति । "तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः । एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च" सा० का० ।